उत्तरायणे पञ्चमवर्षे (बालो यदि क्षमस्तदा तत्पूर्वमपि) गणेशविष्णुसरस्वतीलक्ष्मीकुलग्रामदेवताः विधिवत्सम्पूज्य प्रथमाक्षरारम्भो विधेयः। अश्विनी, आर्द्रा, पुनर्वसु, पुष्य, हस्त, चित्रा, स्वाती, अनुराधा, अभिजित्, श्रवणा, रेवतीनक्षत्रेषु। २,३,५,६,१०,११,१२ तिथिषु। शुक्लपक्षे। कृष्णपक्षे ५ यावत्। चन्द्र—बुधबृहस्पतिशुक्रदिनेषु। वृषमिथुनकन्याधनुमीनलग्नेषु तत्रवांशे चोत्तमः। कुम्भांशकं विनाऽष्टमशुद्धे, गुरौ दशमे, बुधे सप्तमे, शुक्रे लग्ने ग्रहबलाढ्ये शुभः।

### • विद्यारम्भमुहूर्तः •

उत्तरायणे गणेशविष्णुलक्ष्मीसरस्वतीकुलग्रामदेवताश्च सम्पूज्य अक्षरग्रहणे दृढे सञ्जाते सति। सूर्यबुधबृहस्पतिशुक्रवारेषु। २, ३, ५, ६, १०, ११, १२ तिथिषु। अश्विनी, मृगशिरा, आर्द्रा, पुनर्वसु, पुष्य, आश्लेषा, हस्त, चित्रा, स्वाती, मूल, पूर्वा३, श्रवणा, धनिष्ठा, शतभिषानक्षत्रेषु। शुक्लपक्षे। कृष्णपक्षे ५ यावत्। लग्नाष्टमशुद्धे, शुभैः १, ४, ५, ७, ९, १० गतैः, पापैः ३, ६, ११ गतैः। वृषमिथुनकन्याधनुर्मीनान्यतमलग्ने तदंशे वा विद्यारम्भः शुभः।

### • दीक्षाग्रहणमुहूर्तः •

अश्विनी, रोहिणी, पुनर्वसु, पुष्य, उत्तरा३, हस्त, चित्रा, स्वाती, अनुराधा, मूल, अभिजित्, श्रवणा, धनिष्ठा, शतभिषा, रेवतीनक्षत्रेषु। २, ३, ५, ७, १०, ११, १२, १३, १५ तिथिषु। शुक्लपक्षे। अत्यावश्यके कृष्णपक्षे ५ यावत्। सूर्यचन्द्रबुधबृहस्पतिशुक्रदिनेषु। शुद्धसमये प्रातः मध्याह्ने वा। २, ३, ५, ७, ९, १२ लग्नेषु। शुभैः १, ४, ५, ७, ९, १० गतैः, पापैः ३, ६, ११ स्थितैः। वैशाख, श्रावण, आश्विन, कार्त्तिक, अग्रहायण, माघ, फाल्गुनमासेषु (सौरक्रमेण)। सङ्क्रान्तौ, पूर्णिमायाम्, नवरात्रमध्ये, सूर्यग्रहणे, सिद्धिक्षेत्रे, मन्वादि—युगादिषु च मुहूर्तं विनाऽपि दीक्षाग्रहणं शुभम्।

### • व्रतोद्यापनमुहूर्तः •

अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, पुष्य, उत्तरा३, हस्त, चित्रा, स्वाती, अनुराधा, मूल, श्रवणा, धनिष्ठा, शतभिषानक्षत्रेषु। शुद्धसमये क्रियमाणव्रततिथिदिवसेषु दिवसे वा। कार्त्तिक, माघ, फाल्गुन, वैशाख, ज्येष्ठ, आषाढमासेषु। कार्त्तिकव्रतोद्यापनं तुलस्याकाशदीपदानव्रतोद्यापनञ्च शुद्धसमये वृश्चिकसङ्क्रान्तिपूर्वरात्रौ। एवमेव यस्य व्रतस्य मासविशेषेण सह सम्बन्धस्तत्तस्मिन्नेव मासे सति सम्भवे शुद्धसमये कार्यम्। शुभलग्नेषु। शुभैः १, ४, ५, ७, ९, १० स्थितैः, पापैः ३, ६, ११ स्थितैः, पञ्चमेशे नवमेशे गुरौ च बलाढ्ये सति शुभमन्यथा ग्रहशुद्ध्यभावेऽपि परमावश्यके शुभम्।

### • पुराणादिश्रवणमुहूर्तः •

अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, पुष्य, हस्त, चित्रा, स्वाती, अनुराधा, मूल, श्रवणानक्षत्रेषु। २, ३, ५, ७, ८, १०, ११, १२, १३, १५ तिथिषु। सूर्यचन्द्रबुधबृहस्पतिशुक्रदिनेषु। शुक्लपक्षे। कृष्णपक्षे ५ यावत्। शुभलग्ने। लग्ने शुभयुग्दृष्टे बलाढ्ये। शुभैः १, ४, ५, ७, ९, १० स्थितैः, पापैः ३, ६, ११ स्थितैः। उत्तरायणे। श्रावण, आश्विन, कार्त्तिक, मार्गमासेषु शुभम्। तीर्थक्षेत्रे, देवालये, सिद्धक्षेत्रे, पर्वविशेषे, नवरात्रादौ च मुहूर्तं विनाऽपि शुभम्।

### • कल्याणार्थं शान्तिमुहूर्तः •

अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, पुष्य, उत्तरा३, हस्त, चित्रा, स्वाती, अनुराधा, मूल, श्रवणा, धनिष्ठा, शतभिषा, रेवतीनक्षत्रेषु। शुक्लपक्षे, कृष्णपक्षे ५ यावत्। २, ३, ५, ६, ७, ८, १०, ११, १२, १३, १५ तिथिषु। सूर्यचन्द्रबुधबृहस्पतिशुक्रदिनेषु। शुद्धसमये, आवश्यकेऽशुद्धेऽपि। चैत्रपौषभाद्रमलमास—क्षयमासरहिते शुभम्। शुभलग्ने, लग्नस्थे गुरौ, चतुर्थस्थे चन्द्रे, दशमस्थे सूर्ये, अष्टमे लग्ने च पापरहिते शान्तिः शुभा।

### • स्वामिसेवा(नौकरी)मुहूर्तः •

अश्विनी, मृगशिरा, पुष्य, हस्त, चित्रा, अनुराधा, अभिजित्, रेवतीनक्षत्रेषु। सूर्यबुधबृहस्पतिशुक्रदिनेषु। शुभतिथिलग्नेषु। लग्ने शुभयुते, सूर्ये कुजे वा १०, ११ स्थिते, सेव्यसेवकयोर्योनिमैत्र्यां राशीशयोश्चापि मैत्र्यां सत्यां सेवारम्भः शुभः।

### • इन्धनस्थापनमुहूर्तः •

शुभतिथिदिननक्षत्रेषु शुभम्। तत्र सूर्यनक्षत्रात् ६ नक्षत्रेषु शुभम्, ततः ६ अशुभम्, ततः ४ शुभम्, ततः ८ अशुभम्, ततः ४ शुभम्।

## देवालयारम्भगृहारम्भजलाशयारम्भे खातदिग्ज्ञानम्

| खातदिक् | नैर्ऋत्याम् | आग्नेयाम् | ऐशान्याम् | वायव्याम् |
|---|---|---|---|---|
| देवालयारम्भे | ध.म.कुं.सूर्ये | मी.मे.वृ.सूर्ये | मि.क.सिं.सूर्ये | कं.तु.वृ.सूर्ये |
| जलाशयारम्भे | तु.वृ.ध.सूर्ये | म.कुं.मी.सूर्ये | मे.वृ.मि.सूर्ये | क.सिं.कं.सूर्ये |
| गृहारम्भे | वृ.मि.क.सूर्ये | सिं.कं.तु.सूर्ये | वृ.ध.म.सूर्ये | कुं.मी.मे.सूर्ये |

## गृहारम्भे वृषचक्रमर्कभात्

| स्थानम् | नक्षत्रम् | फलानि |
|---|---|---|
| शीर्षे | ०३ | अग्निभयम् |
| अग्रपादे | ०४ | शून्यम् |
| पृष्ठपादे | ०४ | स्थैर्यम् |
| पृष्ठे | ०३ | धनम् |
| दक्षोदरे | ०४ | लाभः |
| पुच्छे | ०३ | नाशः |
| वामोदरे | ०३ | धननाशः |
| मुखे | ०३ | कष्टम् |

## गृहप्रवेशे कुम्भचक्रमर्कभात्

| स्थानम् | नक्षत्रम् | फलानि |
|---|---|---|
| मुखे | ०१ | अग्निदाहः |
| पूर्वे | ०४ | उद्वसनम् |
| दक्षिणे | ०४ | लाभः |
| पश्चिमे | ०४ | धनम् |
| उत्तरे | ०४ | कलहः |
| मध्ये | ०४ | विनाशः |
| अधोभागे | ०३ | स्थिरता |
| कण्ठे | ०३ | स्थिरता |

## सूर्यभात्तडागचक्रम्

| स्थानम् | नक्षत्रम् | फलानि |
|---|---|---|
| पूर्वे | ०२ | जलशोषः |
| आग्नेये | ०३ | बहुजलम् |
| दक्षिणे | ०२ | जलहानिः |
| नैर्ऋत्ये | ०२ | अमृतजलम् |
| पश्चिमे | ०३ | स्वादुजलम् |
| वायव्ये | ०२ | निर्जलम् |
| उत्तरे | ०३ | स्थिरजलम् |
| ईशाने | ०३ | नष्टजलम् |
| मध्ये | ०५ | पूर्णजलम् |
| बाह्ये | ०३ | अमृतजलम् |

## तिथिनन्दादिसंज्ञा

| संज्ञा | नन्दा | भद्रा | जया | रिक्ता | पूर्णा | सिनीवाली | कुहूः |
|---|---|---|---|---|---|---|---|
| तिथयः | १,६,११ | २,७,१२ | ३,८,१३ | ४,९,१४ | ५,१०,१५ | दृष्टेन्दुमा | नष्टेन्दुमा |

## कूपकलनलबोरिङ्गचक्रं रोहिणीभात्

| स्थानम् | नक्षत्रम् | फलानि |
|---|---|---|
| मध्ये | ०३ | शीघ्रस्वादु |
| पूर्वे | ०३ | निर्जलम् |
| आग्नेये | ०३ | शीघ्रजलम् |
| दक्षिणे | ०३ | निर्जलम् |
| नैर्ऋत्ये | ०३ | निर्मलजलम् |
| पश्चिमे | ०३ | शीतलजलम् |
| वायव्ये | ०३ | जलहानिः |
| उत्तरे | ०३ | मधुरजलम् |
| ईशाने | ०३ | क्षारजलम् |

अथवा सूर्यर्क्षादप्येवमेव गणनीयम्

## हवनचक्रं सूर्यभात्

| नक्षत्रम् | ग्रहाः | फलानि |
|---|---|---|
| ०३ | सूर्यः | अशुभम् |
| ०३ | बुधः | शुभम् |
| ०३ | शुक्रः | शुभम् |
| ०३ | शनिः | अशुभम् |
| ०३ | चन्द्रः | शुभम् |
| ०३ | मङ्गलः | अशुभम् |
| ०३ | बृहस्पतिः | शुभम् |
| ०३ | राहुः | अशुभम् |
| ०३ | केतुः | अशुभम् |

## रोहिणीभाद्वापीचक्रम्

| स्थानम् | नक्षत्रम् | फलानि |
|---|---|---|
| पृष्ठे | ०४ | शुभजलम् |
| नाभौ | ०४ | बुद्धिनाशः |
| हृदि | ०४ | स्थिरता |
| मध्ये | ०४ | कलहः |
| नेत्रयोः | ०४ | धनागमः |
| पादयोः | ०८ | दुःखम् |

## चुल्लिकास्थापनमुहूर्तः

अश्विनी, भरणी, विशाखा, रोहिणी, मृगशिरा, उत्तरा३, कृत्तिका, मूल, पूर्वाषाढ, धनिष्ठा, आर्द्रानक्षत्रेषु, सूर्य–मङ्गल–शनि–दिनेषु, शुभतिथिलग्नेषु शुभम्।

## चुल्लिकाचक्रं सूर्यभादिनभावधिः

| स्थानम् | नक्षत्रम् | फलम् |
|---|---|---|
| पृष्ठे | ०६ | धनम् |
| शीर्षे | ०४ | मृत्युभयम् |
| बाहौ | ०८ | सुखम् |
| गर्भे | ०५ | नाशः |
| हस्ते | ०२ | भोगः |
| चरणे | ०२ | स्त्रीमृतिः |

## पृथ्वीशयननक्षत्राणि

सूर्यनक्षत्रात् पञ्च(५),सप्त(७),नव(९), द्वादश(१२),एकोनविंश(१९),षड्विंश(२६) मिते चन्द्रनक्षत्रे पृथ्वी शेते। एषु नक्षत्रेषु तडाग–वापी–कूपखननं–वास्तु–प्रभृतिकार्यं चापाकल–नल–बोरिङ्ग–प्रभृतिस्थापनञ्च न कर्त्तव्यम्।

## गृहारम्भ(वास्तु)मुहूर्तः

वैशाख, ज्येष्ठ, आषाढ (पशुगृहं विना), कार्त्तिक, मार्ग, माघ, फाल्गुन, श्रावण (सौरक्रमेण) मासेषु। सम्मुखकालवर्जितसमये। २, ३, ५, ७, १०, ११, १२, १३, १५ तिथिषु। शुक्लपक्षे। कृष्णपक्षे ५ यावत्। अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, पुष्य, उत्तरा३, हस्त, चित्रा, स्वाती, अनुराधा, मूल, श्रवणा, धनिष्ठा, शतभिषा, रेवतीनक्षत्रेषु पृथ्वीशयननक्षत्ररहितेषु। चन्द्र–बुधबृहस्पतिशुक्रशनिवारेषु। दिवा। शुद्धसमये। शुद्धे वृषचक्रे। २, ३, ५, ६, ८, ९, ११, १२ लग्नेषु। लग्ने शुभदृग्युते। शुभैः १, ४, ५, ७, ९, १० स्थितैः, पापैः ३, ६, ११ स्थितैः, ८, १२ ग्रहरहिते शुभः। देवालयमठादिनिर्माणमप्येष्वेव मुहूर्तेषु शुभम्।

## गृहप्रवेशमुहूर्तः

वैशाख, ज्येष्ठ, आषाढ (पशुगृहं विना), श्रावण, कार्त्तिक, मार्ग, माघ, फाल्गुन (सौरक्रमेण) मासेषु। सम्मुखकालरहितसमये शुभः। २, ३, ५, ७, १०, ११, १२, १३, १५ तिथिषु। शुक्लपक्षे। कृष्णपक्षे ५ यावत्। अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, पुष्य, उत्तरा३, हस्त, चित्रा, स्वाती, अनुराधा, मूल, श्रवणा, धनिष्ठा, शतभिषा, रेवतीनक्षत्रेषु। चन्द्रबुधबृहस्पतिशुक्रशनिदिनेषु। दिवारात्रौ। शुद्धसमये। शुद्धे कुम्भचक्रे। २, ५, ८, ११ लग्नेषूत्तमः, ३, ६, ९, १२ लग्नेषु मध्यमः। जन्मराशिलग्नाभ्यामुपचय ३, ६, १०, ११ राश्यंशयोः स्थिरराशौ, लग्नात् १, ३, ५, ७, ९, १०, ११ स्थानेषु शुभाः, ३, ६, ११ स्थानेषु पापाः, ४, ८ भवने ग्रहरहिते। अग्निभये राजकोपे दैविकप्रकोपे सति यस्मिन् कस्मिन् शुभमुहूर्ते गृहारम्भो गृहप्रवेशश्च कार्यः।

- **चरणिविचारः**—स्वामिहस्तप्रमाणेन दीर्घविस्तारसंयुतम्। अष्टभिश्च हरेद्भागं शेषं चरणिरुच्यते।।**तत्फलम्**—पशुहानिः पशो रोगः पशुलाभः पशुक्षयः। पशुनाशः पशोर्वृद्धिः पशुभेदो बहुपशुः।।
- **मतदानकर्मणि नामाङ्कनमुहूर्तः**—रिक्तामारहिततिथिषु, सुयोगघटितरव्यादिदिनेषु। अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, पुष्य, पूर्वोत्तरा३, हस्त, चित्रा, स्वाती, अनुराधा, ज्येष्ठा, मूल, श्रवणा, धनिष्ठा, रेवतीनक्षत्रेषु। जन्मराशीशलग्नेशमङ्गलसूर्यदशेशैः बलान्वितैः। पापैः ३, ६, ११ गतैः। शुभैः केन्द्रत्रिकोणधनसहजायस्थितैः। वृषमिथुनकर्कसिंहकन्यातुलावृश्चिकधनुकुम्भमीनलग्नेषु। जन्मराशिलग्नाभ्यामुपचय(३,६,११) राशिगतलग्ने शुभग्रहयुतदृष्टे, पापहीनेऽष्टमे नामाङ्कनं शुभम्।
- **राज्याभिषेक(राष्ट्र–राज्य–कार्यभारग्रहण)मुहूर्तः**—अश्विनी, रोहिणी, मृगशिरा, पुष्य, उत्तरा३, हस्त, अनुराधा, ज्येष्ठा, श्रवणा, रेवतीनक्षत्रेषु। रिक्तामा–मङ्गलरहिततिथिदिनेषु। दिवा। जन्मराशीशलग्नेशमङ्गलसूर्यदशेशैः बलान्वितैः। पापैः ३, ६, ११ गतैः। शुभैः केन्द्रत्रिकोणधनसहजायस्थितैः। मिथुनसिंहकन्यातुलावृश्चिककुम्भलग्नेषु। जन्मराशिलग्नाभ्यामुपचय(३,६,११)राशिगतलग्ने शुभग्रहयुतदृष्टे, पापवर्जितेऽष्टमे शुभः।
- **नवान्नपार्वणमुहूर्तः**—अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, पुष्य, उत्तरा३, हस्त, चित्रा, स्वाती, अनुराधा, श्रवणा, धनिष्ठा, शतभिषा, रेवतीनक्षत्रेषु शुभम्, मूले नवान्नपार्वणं मध्यमम्। सूर्यचन्द्रबुधबृहस्पतिदिनेषु, शुक्लपक्षे। २, ३, ५, ७, ८, १०, १२, १५ तिथिषु। वृश्चिकस्य ३।२० अंशतः १३ अंशं यावदावश्यके २३ अंशं यावदपि। ततः मकरे ७ अंशानन्तरं कुम्भस्थे सूर्ये वा कार्यम्। २, ३, ४, ६, ७, ९, १२ लग्नेषु, लग्ने शुभयुग्दृष्टे स्वस्वामियुते वा शुभम्। नवान्नपार्वणे जन्मताराविशाखास्थसूर्यकृष्ण–पक्षाष्टमचन्द्रपूर्वात्रयमघाभरण्याश्लेषाऽऽर्द्रानक्षत्रसौरक्रमेण कार्त्तिकपौषचैत्रहरिशयननन्दात्रयोदशीरिक्तामङ्गलशुक्रशनिदिनानि निषिद्धानि। अभावे कृष्णपक्षे पञ्चमीं यावद् ग्राह्यः।
- **पञ्चक(भदवा)विचारः**—धनिष्ठाशतभिषापूर्वभाद्रोत्तरभाद्ररेवतीनक्षत्राणि पञ्चकसंज्ञकानि। तत्र दक्षिणदिग्गमनगृहाच्छादनप्रेत(पर्णनर)दाह–तृणकाष्ठादिसङ्ग्रहशय्यावितान निर्माणादिकं त्यजेत्। **तत्रापवादः**—वस्वन्ते शतभिग्मध्ये पूर्वादौ चोत्तरान्त्यके। पञ्च पञ्च घटी त्याज्या रेवतीं सकलां त्यजेत्।।

## दग्धतिथिमासान्तादिविचारः

मीने धनुषि स्थिते सूर्ये द्वितीया तिथिः, वृषकुम्भगते सूर्ये चतुर्थी, मेषकर्कगते सूर्ये षष्ठी, मिथुनकन्यागते सूर्येऽष्टमी, सिंहवृश्चिकगते सूर्ये दशमी, तुले मकरे च स्थिते सूर्ये द्वादशी तिथिर्दग्धा भवति। तत्र शुभकार्यं निषिद्धम्। एवमेव **सङ्क्रान्तिदिनं** तत्पूर्वापरदिनञ्च **(मासान्त–मासादिसंज्ञकम्)** यात्रादिसकलशुभकार्येषु त्याज्यम्।

## यात्रामुहूर्तः

वामपृष्ठराहौ। मलमासक्षयमास–सौरक्रमेण चैत्रभाद्रपौषरहितमासेषु। अश्विनी, मृगशिरा, पुनर्वसु, पुष्य, हस्त, ज्येष्ठा, अनुराधा, श्रवणा, रेवतीनक्षत्रेषूत्तमः। रोहिणी, पूर्वा३, चित्रा, स्वाती, मूल, पूर्वाषाढ, धनिष्ठानक्षत्रेषु मध्यमः। मृत्युयोगदग्धतिथिमासान्तसङ्क्रान्तिमासादिप्रभृतिदोषरहिते। अमृतसिद्धसर्वार्थसिद्धादिशुभयोगेषु। अमावास्यां विहायान्यतिथिषु योगवशेनान्यथा शुभतिथिषु। दिक्शूलरहितदिने, २, ४, ६, ८, ९ तारासु। पञ्चमतारायाः प्रथमद्वितीयावृत्त्योश्च। १, २, ३, ५, ६, ७, ९, १०, ११ चन्द्रेषु। आवश्यके ४, १२ चन्द्रेऽपि। द्विरागमनानन्तरं पितृगृहागतायाः पुनः पतिगृहगमने दक्षिणसम्मुखकालौ त्याज्यौ। तदनन्तरमावश्यके केवलं सम्मुखकालस्त्याज्यः, दक्षिणकाले च सम्मुखचन्द्रवशेन यात्रा कार्या।

- **राहु(काल)वासः**—सौरक्रमेण मार्गपौषमाघेषु पूर्वस्यां, फाल्गुनचैत्रवैशाखेषु दक्षिणस्यां, ज्येष्ठाषाढश्रावणेषु पश्चिमायां, भाद्राश्विनकार्त्तिकेषूत्तरस्यां कालवासो भवति।
- **सर्वदिग्गमननक्षत्राणि**—अश्विनीमृगशिरापुष्यश्रवणनक्षत्राणि सर्वदिग्गमने शुभानि।
- **दिक्शूलविचारः**—सोमे शनौ च पूर्वस्याम्, बृहस्पतौ दक्षिणस्याम्, रवौ शुक्रे च पश्चिमायाम्, मङ्गले बुधे चोत्तरस्यान्दिशि दिक्शूलत्वाद्गमनं निषिद्धम्।
- **एतत्परिहारः**—रव्यादिदिनेषु क्रमेण घृत–पयो–गुड–तिल–दधि–यव–माषान् भुक्त्वा शूलदोषोपशान्तये परमावश्यके गच्छेत्।
- **विदिक्शूलविचारः**—शनौ पूर्वे, सोमेऽग्निकोणे, गुरौ दक्षिणे, बुधे नैर्ऋत्यां, सूर्ये प्रतीच्यां, शुक्रे वायव्ये, उत्तरे मङ्गलबुधयोः, ऐशान्यां बुधमन्दयोर्न गन्तव्यम्।

## लग्नचन्द्रयोर्वासः

मेषसिंहधनूराशिषु पूर्वस्याम्, वृषकन्यामकरराशिषु दक्षिणस्याम्, मिथुनतुलकुम्भराशिषु पश्चिमायाम्, कर्कवृश्चिकमीनराशिषु चोत्तरस्यां लग्नचन्द्रयोर्वासः। सम्मुखदक्षिणलग्नचन्द्रयोः यात्रा शुभा। परं सर्वदिग्गमननक्षत्रेषु वामपृष्ठचन्द्रेऽपि यात्रा शुभा।

## चन्द्रविचारः

जन्मनामग्रामादिराशितोऽभीष्टदिनस्य चन्द्रं यावद्गणनीयम्। तत्र १, २, ३, ५, ६, ७, ९, १०, ११ सङ्ख्याकश्चन्द्रः शुभप्रदः। ८ चन्द्रः कष्टप्रदः। ४ कलहप्रदः। १२ हानिकारकः। तत्र अशुभचन्द्रदोषशान्त्यर्थम् आमतण्डुल–शङ्ख–दधि–श्वेतवस्त्रादिदानं कार्यम्। **विशेषः**—चन्द्रविचारः सर्वेषु शुभकार्येषु कर्त्तव्यः।

## द्वादशचन्द्रस्य विशेषः

आधाने सम्प्रदाने च विवादे राजविग्रहे। पाणिग्रहे प्रयाणे च चन्द्रो द्वादशगः शुभः।।अभिषेके निषेके च गृहे पुंसवनादिषु।यात्रा युद्धे विवादे च चन्द्रो द्वादशगः शुभः।।

## जन्मराशि–नामराशिवशेन विचारणीयविषयाः

विवाहे सर्वमङ्गल्ये यात्रायां ग्रहगोचरे। जन्मराशिप्रधानत्वं नामराशिं न चिन्तयेत्।। देशे ग्रामे गृहे युद्धे सेवायां व्यवहारके। नामराशिप्रधानत्वं जन्मराशिं न चिन्तयेत्।। काकिण्यां वर्गशुद्धौ च वादे द्यूते स्वरोदये। मन्त्रे पुनर्भूवरणे नामराशेः प्रधानता।।

- **जन्मनक्षत्रे त्याज्याः**—जन्मनक्षत्रगश्चन्द्रः प्रशस्तः सर्वकर्मसु। क्षौरभैषज्यवादाध्वकर्त्तनेषु विवर्जयेत्। • **जन्ममासे त्याज्याः**—क्षौरकर्म दीर्घयात्रा कर्णवेधश्च।

## इष्टकारम्भमुहूर्तः

अश्विनी,रोहिणी,मृगशिरा,पुष्य,उत्तरा३,हस्त,ज्येष्ठा,श्रवणा,रेवतीनक्षत्रेषु। वृषसिंहालिकुम्भलग्नेषु। रविगुरुशनिदिनेषु,शुभतिथिषु,चैत्रभाद्रपौषमलमासक्षयमासभिन्नसमये शुभः।

## वृक्षादिरोपणमुहूर्तः

अश्विनी, रोहिणी, मृगशिरा, पुष्य, उत्तरा३, चित्रा, विशाखा, अनुराधा, मूल, अभिजित्, शतभिषा, रेवतीनक्षत्रेषु। चन्द्रबृहस्पतिशुक्रदिनेषु। शुभतिथिषु च शुभम्।

## कदलीरोपणमुहूर्तः

पञ्चक (धनिष्ठा, शतभिषा, पूर्वभाद्र, उत्तरभाद्र, रेवती) रहितनक्षत्रेषु। प्रतिपद्–द्वितीया–तृतीया–चतुर्थी–षष्ठीतिथिषु। शुभदिनेषु शुभम्।

## • सिद्ध्यादियोगचक्रं तिथिदिननक्षत्रवशेन •

| दिनानि | रविः | चन्द्रः | मङ्गलः | बुधः | बृहस्पतिः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| सिद्धियोगः | ३, ८, १३ | १, ६, ११ | ३,८,१३ | २, ७, १२ | ५, १०, १५ | १, ६, ११ | ४,९,१४ |
| अमृतयोगः | ५, १०, १५ | ५, १०, १५ | २,७,१२ | १, ६, ११ | ३, ८, १३ | ४, ९, १४ | १,६,११ |
| सर्वार्थसिद्धि योगः | अश्विनी,पुष्य हस्त,मूल | रोहिणी,मृगशिरा पुष्य,अनुराधा,श्रवणा | अश्विनी | रोहिणी,मृगशिरा हस्त,अनुराधा | अश्विनी,पुनर्वसु पुष्य,अनुराधा,रेवती | अश्विनी,पुनर्वसु अनुराधा,श्रवणा,रेवती | रोहिणी स्वाती,श्रवणा |
| मृत्युयोगः | १, ६, ११ | २, ७, १२ | १,६,११ | ३, ८, १३ | ४, ९, १४ | २, ७, १२ | ५,१०,१५ |
| राज्यप्रदयोगः | ——— | ——— | ४,९,१४ | ——— | ——— | ——— | ४,९,१४ |
| मध्यमयोगः | १२ | ११ | १० | ३ | ६ | २ | ७ |

## • ताराचक्रम् •

| ताराः | जन्म | सम्पत् | विपत् | क्षेमः | प्रत्यरिः | साधकः | वधः | मित्रम् | अतिमित्रम् |
|---|---|---|---|---|---|---|---|---|---|
| नक्षत्राणि | १,१०,१९ | २,११,२० | ३,१२,२१ | ४,१३,२२ | ५,१४,२३ | ६,१५,२४ | ७,१६,२५ | ८,१७,२६ | ९,१८,२७ |
| फलानि | मध्यमम् | शुभम् | अशुभम् | शुभम् | अशुभम् | शुभम् | अशुभम् | शुभम् | शुभम् |
| दानानि | शाकम् | ——— | गुडम् | ——— | लवणम् | ——— | तिलाः | ——— | ——— |

जन्मनामग्रामनक्षत्राद्वाऽभीष्टदिनावधि गणयित्वा नवभिर्हरेत्। शेषं तारा स्यात्। तत्र २, ४, ६, ८, ९ ताराः शुभदाः। प्रथमतारा मध्यमा। ३,७ अशुभदा। **विशेषः**—सर्वेषु शुभकार्येषु ताराविचारः कर्त्तव्यः। पञ्चमतारा आवृत्तिवशेन धनदा १ सुखदा २ मृत्युदा च भवेत्तेन प्रत्यरिताराया: केवलं तृतीयावृत्तेस्तारा अशुभा, तत्र दानं कार्यम्।

• **कालशूलम्**—उषःकाले पूर्वस्याम्, मध्याह्ने दक्षिणस्याम्, सायङ्काले (गोधूल्याम्) पश्चिमायाम्, निशीथे चोत्तरस्यां न गच्छेत्, कालशूलदोषत्वात्।

## • युद्धयात्रायां कुलाकुलचक्रम् •

| संज्ञा | नक्षत्राणि | तिथयः | दिनानि | फलानि |
|---|---|---|---|---|
| कुलः | अश्विनी, कृत्तिका, मृगशिरा, पुष्य, मघा, पूर्वा३, चित्रा, विशाखा, ज्येष्ठा, श्रवणा | ४, ८, १२, १४ | मङ्गल, शुक्र | स्थायिजयदः (मुद्दालह) |
| अकुलः | भरणी, रोहिणी, पुनर्वसु, आश्लेषा, उत्तरा३, हस्त, स्वाती, अनुराधा, धनिष्ठा, रेवती | १, ३, ५, ७ ९, ११, १३, १५ | सूर्य, चन्द्र बृहस्पति, शनि | यायिजयदः (मुद्दई) |
| कुलाकुलः | आर्द्रा, मूल, अभिजित्, शतभिषा | २, ६, १० | बुध | उभयोः सन्धिः |

## • नष्टवस्तुज्ञानाय चक्रम् •

| संज्ञा | नक्षत्राणि | लाभालाभः | नष्टवस्तुदिक् |
|---|---|---|---|
| अन्धाक्षः | रोहिणी, पुष्य, उत्तरफल्गुनी, विशाखा, पूर्वाषाढ, धनिष्ठा, रेवती | शीघ्रलाभः | पूर्वस्याम् |
| मन्दाक्षः | मृगशिरा, आश्लेषा, हस्त, अनुराधा, उत्तराषाढ, शतभिषा, अश्विनी | प्रयत्नाल्लाभः | दक्षिणस्याम् |
| मध्याक्षः | आर्द्रा, मघा, चित्रा, ज्येष्ठा, अभिजित्, पूर्वभाद्र, भरणी | दूरे श्रवणमलाभश्च | पश्चिमायाम् |
| सुलोचनः | पुनर्वसु, पूर्वफल्गुनी, स्वाती, मूल, श्रवणा, उत्तरभाद्र, कृत्तिका | अलाभः | उत्तरस्याम् |

• **खलकस्थापनमुहूर्तः**—ग्रामसमीपे उच्चप्रदेशे प्रसन्नभूमौ शुभस्थाने शुभतिथिदिननक्षत्रेषु शुभम्।

### • धान्यच्छेदनमुहूर्तः •

मूल, ज्येष्ठा, आश्लेषा, आर्द्रा, पूर्वभाद्र, हस्त, कृत्तिका, धनिष्ठा, श्रवणा, मृगशिरा, स्वाती, मघा, उत्तरा३, पूर्वाषाढ, भरणी, चित्रा, पुष्यनक्षत्रेषु। सूर्यचन्द्रबुधबृहस्पतिशुक्रदिनेषु। १,२,३,५,७,१०,११,१२,१३,१५ तिथिषु। २,५,८,११ लग्नेषु शुभम्। अन्यान्यपि यवगोधूमादीनि एष्वेव छेद्यानि।

### • मेधिरोपणमुहूर्तः •

अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, पुष्य, उत्तरा३, हस्त, चित्रा, स्वाती, अनुराधा, श्रवणा, धनिष्ठा, शतभिषानक्षत्रेषु। शुभतिथि—दिन—लग्नेषु मेधिरोपणं शुभम्।

### • वर्षेशवशेन मेधिविचारः •

वर्षेशे सूर्ये वंशस्य, चन्द्रे शिम्बरस्य, मङ्गले कदम्बस्य, बुधे उदुम्बरस्य, गुरौ आम्रस्य, भृगुजे पलाशस्य, शनौ निम्बस्य मेधिरोपणं शुभम्।

### • कणमर्दनमुहूर्तः •

मघा, पूर्वफल्गुनी, उत्तरफल्गुनी, रोहिणी, ज्येष्ठा, मूल, अनुराधा, श्रवणा, रेवतीनक्षत्रेषु। शुभतिथिदिनलग्नेषु शुभम्।

### • धान्यस्थापनमुहूर्तः •

अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, पुष्य, उत्तरा३, हस्त, चित्रा, स्वाती, अनुराधा, मूल, श्रवणा, धनिष्ठा, शतभिषा, रेवतीनक्षत्रेषु। शुभतिथिदिनयोः, २, ३, ५, ८, ९, १०, ११, १२ लग्नेषु शुभम्।

### • धान्यवृद्धिमुहूर्तः •

अश्विनी, रोहिणी, पुनर्वसु, पुष्य, उत्तरा३, स्वाती, विशाखा, ज्येष्ठा, श्रवणा, धनिष्ठा, शतभिषानक्षत्रेषु। शुभतिथिदिनलग्नेषु धान्यवृद्धिः शुभा।

### • बीजस्थापनमुहूर्तः •

रोहिणी, मृगशिरा, मघा, हस्त, स्वाती, मूल, उत्तराषाढ, पूर्वभाद्र, रेवतीनक्षत्रेषु। चन्द्रबुधबृहस्पतिशुक्रदिनेषु। शुक्लपक्षे, कृष्णपक्षे ५ यावत्। २, ३, ५, ७, १०, ११, १२, १३, १५ तिथिषु। २, ५, ८, ११ लग्नेषु शुभम्।

### • बीजवपनमुहूर्तः •

अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, पुष्य, उत्तरा३, हस्त, चित्रा, स्वाती, अनुराधा, श्रवणा, धनिष्ठा, पुष्य, रेवतीनक्षत्रेषु। २, ३, ५, ८, १०, ११, १२, १३, १५ तिथिषु। चन्द्रबुधबृहस्पतिशुक्रदिनेषु। शुभलग्नेषु, लग्ने शुभदृग्युते, शुभैः केन्द्रकोणगैः, पापैः त्रिषडायगैः शुभम्।

### • हलप्रवहणमुहूर्तः •

अश्विनी, रोहिणी, मृगशिरा, पुनर्वसु, मघा, उत्तरा३, हस्त, चित्रा, स्वाती, विशाखा, अनुराधा, मूल, श्रवणा, धनिष्ठा, शतभिषा, रेवतीनक्षत्रेषु। चन्द्रमङ्गलबुधबृहस्पतिशुक्रदिनेषु। शुभतिथिषु। शुभलग्नेषु। पापैः निर्बलैः, शुभैः सुबलिभिः, चन्द्रे जलचरराशिस्थे तन्नवांशे वा, गुरौ लग्नस्थे, शुक्रे विधौ च पुष्टे शुभम्।

### • धान्यरोपणमुहूर्तः •

रोहिणी, उत्तरफल्गुनी, विशाखा, मूल, शतभिषा, पूर्वभाद्रपदनक्षत्रेषु। सूर्यचन्द्रबुधबृहस्पतिशुक्रदिनेषु। शुभतिथिषु, शुभलग्नेषु च शुभम्।

### • कोषागारादौ द्रव्यस्थापनमुहूर्तः •

अश्विनी, मृगशिरा, पुनर्वसु, पुष्य, हस्त, चित्रा, स्वाती, अनुराधा, श्रवणा, धनिष्ठा, रेवतीनक्षत्रेषु। सूर्यमङ्गलबुधशुक्रदिनेषु। शुद्धसमये। ३, ५, ८, १०, १३, १५ तिथिषु। शुभग्रहयुक्तलग्नेषु शुभम्।

• **त्रिविधप्रवेशः**—दिवा नृपप्रवेशः, निशि वधूप्रवेशः, दिवा च रात्रौ च गृहप्रवेशः शुभः।

## • अग्निवासचक्रम् •

| शुक्लपक्षे | | | | कृष्णपक्षे | | | | रवि | चन्द्र | मङ्गल | बुध | बृहस्पति | शुक्र | शनि |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | ५ | ९ | १३ | २ | ६ | १० | १४ | भुवि | भुवि | दिवि | भूतले | भुवि | भुवि | दिवि |
| २ | ६ | १० | १४ | ३ | ७ | ११ | ३० | भुवि | दिवि | भूतले | भुवि | भुवि | दिवि | भूतले |
| ३ | ७ | ११ | १५ | — | ४ | ८ | १२ | दिवि | भूतले | भुवि | भुवि | दिवि | भूतले | भुवि |
| — | ४ | ८ | १२ | १ | ५ | ९ | १३ | भूतले | भुवि | भुवि | दिवि | भूतले | भुवि | भुवि |

फलम्—भुवि सौख्यम्, दिवि प्राणनाशः, भूतले च धननाश इति ज्ञेयम्।

विधिः—(शुक्लादितिथिसङ्ख्या+सूर्यादिदिनसङ्ख्या+१)÷४=३,० शेषे शुभः। १, २ शेषे अशुभः।

• **पार्थिवशिवपूजायां विहिततिथयः**—शुक्लपक्षे—२, ५, ६, ९, १२, १३. कृष्णपक्षे—१, ४, ५, ८, ११, १२, ३०. शिवस्वामिकत्वादष्टमीचतुर्दशी अपि शुभे।

विधिः—(शुक्लादितिथिसङ्ख्या X २ + ५) ÷ ७ = १, २, ३ शेषे शुभम्। अन्यदशुभम्। १ शेषे कैलाशे, २ शेषे गौरिसन्निधौ, ३ शेषे वृषारूढः शिवः अभीष्टदः स्यात्।

### • हलचक्रमर्कभुक्तभात् •

| नक्षत्रम् | ३ | ८ | ९ | ८ |
|---|---|---|---|---|
| फलम् | अशुभं | शुभं | अशुभं | शुभं |

### • बीजवपने फणिचक्रं राहुभात् •

| नक्षत्रम् | ८ | ३ | १ | ३ | १ | ३ | १ | ३ | ४ |
|---|---|---|---|---|---|---|---|---|---|
| फलम् | अशुभं | शुभं | अशुभं | शुभं | अशुभं | शुभं | अशुभं | शुभं | अशुभं |

### • ऋणप्रदानमुहूर्तः(द्रव्यप्रयोगमुहूर्तः) •

स्वाती, पुनर्वसु, मृगशिरा, रेवती, चित्रा, अनुराधा, विशाखा, पुष्य, श्रवणा, धनिष्ठा, शतभिषानक्षत्रेषु। शुभतिथिषु, १,४,७,१० लग्नेषु, लग्ने शुभयुग्दृष्टे, ५,८,९ ग्रहरहिते, चन्द्रगुरुशुक्रशनिदिनेषु शुभम्।

**ऋणदाने निषिद्धसमयः**—बुधवासरः, भरणी, कृत्तिका, आर्द्रा, आश्लेषा, मघा, पूर्वा३, चित्रा, ज्येष्ठानक्षत्राणि, भद्रा पातयोगश्च।

**ऋणग्रहणे निषिद्धसमयः**—रविभौमदिने। सङ्क्रान्तिः। वृद्धियोगः। हस्तनक्षत्रम्। एषु ऋणार्पणं शुभम्।

### • विपणिमुहूर्तः •

अश्विनी, पुष्य, हस्त, उत्तरा३, अनुराधा, अभिजित्, रेवतीनक्षत्रेषु। १,२,३,५,६,७,१०,११,१२,१३,१५ तिथिषु। सूर्यचन्द्रबुधबृहस्पतिशुक्रशनिदिनेषु। शुक्लपक्षे, कृष्णे १० यावत्। १,२,३,४,५,६,७,८,९,१०,१२ लग्नेषु, लग्ने चन्द्रशुक्रे, पापैः ८, २ रहितैः, शुभैः २,१०,११ स्थितैः शुभा।

### • मीलचालनमुहूर्तः •

अश्विनी, पुनर्वसु, पुष्य, हस्त, चित्रा, अनुराधा, ज्येष्ठा, धनिष्ठा, शतभिषा, रेवतीनक्षत्रेषु। शुभतिथिदिनेषु। चरलग्नेषु। शुभैः १, २, ४, ५, ७, १० स्थितैः, पापैः ३, ६, ११ स्थितैः शुभम्।

• **वस्तूनां क्रयमुहूर्तः**—शुभतिथिदिनलग्नेषु। अश्विनी,चित्रा,स्वाती,श्रवणा,शतभिषा,रेवतीभेषु शुभः।

• **रक्तमोक्षण(ऑपरेशन)मुहूर्तः**—अश्विनी,रोहिणी, मृगशिरा, पुष्य, हस्त, चित्रा, स्वाती, अनुराधा, ज्येष्ठा, अभिजित्, श्रवणा, शतभिषानक्षत्रेषु। सूर्यमङ्गलबृहस्पतिदिनेषु। शुभतिथिलग्नेषु शुभा।

## प्रथमलग्नसारिणी—इष्टार्कराश्यंशतले घटीपलं स्वाभीष्टनाडीपलसंयुतञ्च। यद्राशिभागस्य तले स्थितं भवेत्तदेव लग्नञ्च कलानुपातात्।।

| अंश | ०० | ०१ | ०२ | ०३ | ०४ | ०५ | ०६ | ०७ | ०८ | ०९ | १० | ११ | १२ | १३ | १४ | १५ | १६ | १७ | १८ | १९ | २० | २१ | २२ | २३ | २४ | २५ | २६ | २७ | २८ | २९ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| मेष | ०२ | ०२ | ०३ | ०३ | ०३ | ०३ | ०३ | ०३ | ०३ | ०३ | ०४ | ०४ | ०४ | ०४ | ०४ | ०४ | ०४ | ०५ | ०५ | ०५ | ०५ | ०५ | ०५ | ०५ | ०६ | ०६ | ०६ | ०६ | ०६ | ०६ |
| ३ | ४७ | ५४ | ०१ | ०८ | १६ | २३ | ३० | ३८ | ४६ | ५४ | ०३ | ११ | १९ | २८ | ३६ | ४४ | ५३ | ०१ | १० | १८ | २६ | ३५ | ४३ | ५१ | ०० | ०८ | १६ | २५ | ३३ | ४२ |
| ३८ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | २२ | ४४ | ०६ | २८ | ५० | १२ | ३४ | ५६ | १८ | ४० | ०२ | २४ | ४६ | ०८ | ३० | ५२ | १४ | ३६ | ५८ | २० | ४२ | ०४ |
| वृष | ०६ | ०६ | ०७ | ०७ | ०७ | ०७ | ०७ | ०७ | ०७ | ०८ | ०८ | ०८ | ०८ | ०८ | ०८ | ०९ | ०९ | ०९ | ०९ | ०९ | १० | १० | १० | १० | १० | १० | ११ | ११ | ११ | ११ |
| ४ | ५० | ५८ | ०७ | १५ | २३ | ३२ | ४० | ४९ | ५९ | ०९ | १९ | २९ | ३९ | ४९ | ५९ | ०९ | १९ | ३० | ४० | ५० | ०० | १० | २० | ३० | ४० | ५० | ०० | ११ | २१ | ३१ |
| ११ | २६ | ४८ | १० | ३२ | ५४ | १६ | ३८ | ०० | ०६ | १२ | १८ | २४ | ३० | ३६ | ४२ | ४८ | ५४ | ०० | ०६ | १२ | १८ | २४ | ३० | ३६ | ४२ | ४८ | ५४ | ०० | ०६ | १२ |
| मिथुन | ११ | ११ | १२ | १२ | १२ | १२ | १२ | १२ | १३ | १३ | १३ | १३ | १३ | १४ | १४ | १४ | १४ | १४ | १४ | १५ | १५ | १५ | १५ | १५ | १६ | १६ | १६ | १६ | १६ | १७ |
| ५ | ४१ | ५१ | ०१ | ११ | २१ | ३१ | ४१ | ५२ | ०३ | १४ | २६ | ३७ | ४९ | ०० | १२ | २३ | ३४ | ४६ | ५७ | ०९ | २० | ३३ | ४३ | ५४ | ०६ | १७ | २९ | ४० | ५२ | ०३ |
| ३ | १८ | २४ | ३० | ३६ | ४२ | ४८ | ५४ | ०० | २६ | ५२ | १८ | ४४ | १० | ३६ | ०२ | २८ | ५४ | २० | ४६ | १२ | ३८ | ०४ | ३० | ५६ | २२ | ४८ | १४ | ४० | ०६ | ३२ |
| कर्क | १७ | १७ | १७ | १७ | १८ | १८ | १८ | १८ | १८ | १८ | १९ | १९ | १९ | १९ | १९ | २० | २० | २० | २० | २० | २१ | २१ | २१ | २१ | २१ | २२ | २२ | २२ | २२ | २२ |
| ५ | १४ | २५ | ३७ | ४९ | ०० | १२ | २३ | ३५ | ४६ | ५८ | ०९ | २१ | ३२ | ४४ | ५५ | ०७ | १९ | ३० | ४२ | ५३ | ०५ | १६ | २८ | ४० | ५१ | ०३ | १४ | २६ | ३७ | ४९ |
| ४३ | ५८ | २४ | ५० | १६ | ४२ | ०८ | ३४ | ०० | ३४ | ०८ | ४२ | १६ | ५० | २४ | ५८ | ३२ | ०६ | ४० | १४ | ४८ | २२ | ५६ | ३० | ०४ | ३८ | १२ | ४६ | २० | ५४ | २८ |
| सिंह | २३ | २३ | २३ | २३ | २३ | २३ | २४ | २४ | २४ | २४ | २४ | २५ | २५ | २५ | २५ | २५ | २६ | २६ | २६ | २६ | २६ | २६ | २७ | २७ | २७ | २७ | २७ | २८ | २८ | २८ |
| ५ | ०१ | १२ | २४ | ३५ | ४७ | ५८ | १० | २२ | ३३ | ४४ | ५५ | ०७ | १८ | २९ | ४० | ५२ | ०३ | १४ | २५ | ३७ | ४८ | ५९ | ११ | २२ | ३३ | ४४ | ५६ | ०७ | १८ | २९ |
| ४७ | ०२ | ३६ | १० | ४४ | १८ | ५२ | २६ | ०० | १६ | ३२ | ४५ | ०४ | २० | ३६ | ५२ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ |
| कन्या | २८ | २८ | २९ | २९ | २९ | २९ | २९ | ३० | ३० | ३० | ३० | ३० | ३० | ३१ | ३१ | ३१ | ३१ | ३१ | ३२ | ३२ | ३२ | ३२ | ३२ | ३३ | ३३ | ३३ | ३३ | ३३ | ३३ | ३४ |
| ५ | ४१ | ५२ | ०३ | १४ | २६ | ३७ | ४८ | ०० | ११ | २२ | ३३ | ४५ | ५६ | ०७ | १८ | ३० | ४१ | ५२ | ०३ | १५ | २६ | ३७ | ४९ | ०० | ११ | २२ | ३४ | ४५ | ५६ | ०७ |
| ३८ | ०८ | २४ | २० | ५६ | १२ | २८ | ४४ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | १५ | ३२ | ४८ | ०४ | २० | ३६ | ५२ |
| तुला | ३४ | ३४ | ३४ | ३४ | ३५ | ३५ | ३५ | ३५ | ३५ | ३६ | ३६ | ३६ | ३६ | ३६ | ३६ | ३७ | ३७ | ३७ | ३७ | ३७ | ३८ | ३८ | ३८ | ३८ | ३८ | ३९ | ३९ | ३९ | ३९ | ३९ |
| ५ | १९ | ३० | ४१ | ५२ | ०४ | १५ | २६ | ३८ | ४९ | ०१ | १२ | २४ | ३५ | ४७ | ५८ | १० | २२ | ३३ | ४३ | ५६ | ०८ | १९ | ३१ | ४३ | ५४ | ०६ | १७ | २९ | ४० | ५२ |
| ३८ | ०८ | २४ | २० | ५६ | १२ | २८ | ४४ | ०० | ३४ | ०८ | ४२ | १६ | ५० | २४ | ५८ | ३२ | ०६ | ४० | १४ | ४८ | २२ | ५६ | ३० | ०४ | ३८ | १२ | ४६ | २० | ५४ | २८ |
| वृश्चिक | ४० | ४० | ४० | ४० | ४० | ४१ | ४१ | ४१ | ४१ | ४१ | ४१ | ४२ | ४२ | ४२ | ४२ | ४२ | ४३ | ४३ | ४३ | ४३ | ४३ | ४४ | ४४ | ४४ | ४४ | ४४ | ४५ | ४५ | ४५ | ४५ |
| ५ | ०४ | १५ | २७ | ३८ | ५० | ०१ | १३ | २५ | ३६ | ४७ | ५९ | १० | २२ | ३३ | ४५ | ५६ | ०७ | १९ | ३० | ४२ | ५३ | ०५ | १६ | २७ | ३९ | ५० | ०२ | १३ | २५ | ३६ |
| ४७ | ०२ | ३६ | १० | ४४ | १८ | ५२ | २६ | ०० | २६ | ५२ | १८ | २४ | १० | ३६ | ०२ | २८ | ५४ | २० | ४६ | १२ | ३८ | ०४ | ३० | ५६ | २२ | ४८ | १४ | ४० | ०६ | ३२ |
| धनु | ४५ | ४५ | ४६ | ४६ | ४६ | ४६ | ४६ | ४७ | ४७ | ४७ | ४७ | ४७ | ४७ | ४८ | ४८ | ४८ | ४८ | ४८ | ४८ | ४९ | ४९ | ४९ | ४९ | ४९ | ४९ | ५० | ५० | ५० | ५० | ५० |
| ५ | ४७ | ५९ | १० | २२ | ३३ | ४५ | ५६ | ०८ | १८ | २८ | ३८ | ४८ | ५८ | ०८ | १८ | २८ | ३८ | ४९ | ५९ | ०९ | १९ | २९ | ३९ | ४९ | ५९ | ०९ | १९ | ३० | ४० | ५० |
| ४३ | ५८ | २४ | ५० | १६ | ४२ | ०८ | ३४ | ०० | ०६ | १२ | १८ | २४ | ३० | ३६ | ४२ | ४८ | ५४ | ०० | ०६ | १२ | १८ | २४ | ३० | ३६ | ४२ | ४८ | ५४ | ०० | ०६ | १२ |
| मकर | ५१ | ५१ | ५१ | ५१ | ५१ | ५१ | ५२ | ५२ | ५२ | ५२ | ५२ | ५२ | ५२ | ५३ | ५३ | ५३ | ५३ | ५३ | ५३ | ५३ | ५३ | ५४ | ५४ | ५४ | ५४ | ५४ | ५४ | ५४ | ५५ | ५५ |
| ५ | ०० | १० | २० | ३० | ४० | ५० | ०० | ११ | १९ | २७ | ३६ | ४४ | ५२ | ०१ | ०९ | १७ | २६ | ३४ | ४३ | ५१ | ५९ | ०८ | १६ | २४ | ३३ | ४१ | ४९ | ५८ | ०६ | १५ |
| ३ | १८ | २४ | ३० | ३६ | ४२ | ४८ | ५४ | ०० | २२ | ४४ | ०६ | २८ | ५० | १२ | ३४ | ५६ | १८ | ४० | ०२ | २४ | ४६ | ०८ | ३० | ५२ | १४ | ३६ | ५८ | २० | ४२ | ०४ |
| कुम्भ | ५५ | ५५ | ५५ | ५५ | ५५ | ५६ | ५६ | ५६ | ५६ | ५६ | ५६ | ५६ | ५६ | ५७ | ५७ | ५७ | ५७ | ५७ | ५७ | ५७ | ५७ | ५७ | ५८ | ५८ | ५८ | ५८ | ५८ | ५८ | ५८ | ५९ |
| ४ | २३ | ३१ | ४० | ४८ | ५६ | ०५ | १३ | २२ | २९ | ३६ | ४३ | ५१ | ५८ | ०५ | १२ | २० | २७ | ३४ | ४१ | ४९ | ५६ | ०३ | ११ | १८ | २५ | ३३ | ४० | ४७ | ५४ | ०१ |
| ११ | २६ | ४८ | १० | ३२ | ५४ | १६ | ३८ | ०० | १६ | ३२ | ४८ | ०४ | ४० | ३६ | ५२ | ०८ | ५७ | ४० | ५९ | १२ | ५८ | ४० | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ |
| मीन | ५९ | ५९ | ५९ | ५९ | ५९ | ५९ | ५९ | ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०१ | ०१ | ०१ | ०१ | ०१ | ०१ | ०१ | ०१ | ०२ | ०२ | ०२ | ०२ | ०२ | ०२ |
| ३ | ०९ | १६ | २३ | ३० | ३८ | ४५ | ५२ | ०० | ०७ | १४ | २१ | २९ | ३६ | ४३ | ५० | ५८ | ०५ | १२ | १९ | २७ | ३४ | ४१ | ४९ | ५६ | ०३ | १० | १८ | २५ | ३२ | ३९ |
| ३८ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ |

**उदाहरण—** श्रावणकृष्ण प्रतिपदा शुक्र को इष्टदण्डादि ११।३० है। इस दिन सूर्य के मिथुनराशि के २५ अंश के नीचे दण्डादि १६।१७।४८ में इष्टदण्डादि ११।३० जोड़ने से १६।१७।४८ + ११।३० = २७।४७।४८ हुआ। यह दण्डादि सिंहराशि के २५ अंश के आगे २६ अंश के नीचे प्राप्त हुआ। अतः उक्त समय २६ अंश से सिंह लग्न हुआ। एवमेव सर्वत्र ज्ञातव्य है।

## दशमलग्नसारिणी—यत्सूर्यराश्यंशसमानकोष्ठे घट्यादिकं पूर्वनतेन हीनम्। प्रत्यग्नतेनाढ्यमियान् विशेषो मध्यस्य(दशमलग्नस्य)सिद्ध्यै गणकैः प्रदिष्टः।।

| अंश | ०० | ०१ | ०२ | ०३ | ०४ | ०५ | ०६ | ०७ | ०८ | ०९ | १० | ११ | १२ | १३ | १४ | १५ | १६ | १७ | १८ | १९ | २० | २१ | २२ | २३ | २४ | २५ | २६ | २७ | २८ | २९ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| मेष | ०३ | ०३ | ०३ | ०४ | ०४ | ०४ | ०४ | ०४ | ०४ | ०४ | ०५ | ०५ | ०५ | ०५ | ०५ | ०५ | ०६ | ०६ | ०६ | ०६ | ०६ | ०६ | ०७ | ०७ | ०७ | ०७ | ०७ | ०७ | ०८ | ०८ |
| | ३३ | ४२ | ५१ | ०० | १० | १९ | २८ | ३८ | ४७ | ५७ | ०७ | १७ | २७ | ३७ | ४७ | ५७ | ०७ | १७ | २७ | ३७ | ४७ | ५७ | ०७ | १७ | २७ | ३७ | ४७ | ५७ | ०७ | १७ |
| २७८ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | ५८ | ५६ | ५४ | ५२ | ५० | ४८ | ४६ | ४४ | ४२ | ४० | ३८ | ३६ | ३४ | ३२ | ३० | २८ | २६ | २४ | २२ | २० | १८ | १६ |
| वृष | ०८ | ०८ | ०८ | ०८ | ०९ | ०९ | ०९ | ०९ | ०९ | ०९ | १० | १० | १० | १० | १० | ११ | ११ | ११ | ११ | ११ | ११ | १२ | १२ | १२ | १२ | १२ | १३ | १३ | १३ | १३ |
| | २७ | ३७ | ४७ | ५६ | ०७ | १७ | २७ | ३७ | ४७ | ५८ | ०९ | २० | ३० | ४१ | ५२ | ०३ | १३ | २४ | ३५ | ४६ | ५६ | ०७ | १८ | २९ | ४० | ५० | ०१ | १२ | २३ | ३३ |
| २९९ | १४ | १२ | १० | ०८ | ०६ | ०४ | ०२ | ०० | ४६ | ३२ | १८ | ०४ | ५० | ३६ | २२ | ०८ | ५४ | ४० | २६ | १२ | ५८ | ४४ | ३० | १६ | ०२ | ४८ | ३४ | २९ | ०६ | ५२ |
| मिथुन | १३ | १३ | १४ | १४ | १४ | १४ | १४ | १५ | १५ | १५ | १५ | १५ | १५ | १६ | १६ | १६ | १६ | १६ | १६ | १७ | १७ | १७ | १७ | १७ | १८ | १८ | १८ | १८ | १८ | १८ |
| | ४४ | ५५ | ०६ | १६ | २७ | ३८ | ४९ | ०० | १० | २१ | ३२ | ४३ | ५३ | ०४ | १५ | २६ | ३६ | ४७ | ५८ | ०९ | १९ | ३० | ४१ | ५२ | ०९ | १३ | २४ | ३५ | ४६ | ५६ |
| ३२३ | ३८ | २४ | १० | ५६ | ४२ | २८ | १४ | ०० | ४६ | ३२ | १८ | ०४ | ५० | ३६ | २२ | ०८ | ५४ | ४० | २६ | १२ | ५८ | ४४ | ३० | १६ | ०२ | ४८ | ३४ | २० | ०६ | ५२ |
| कर्क | १९ | १९ | १९ | १९ | १९ | २० | २० | २० | २० | २० | २० | २१ | २१ | २१ | २१ | २१ | २१ | २२ | २२ | २२ | २२ | २२ | २२ | २३ | २३ | २३ | २३ | २३ | २३ | २४ |
| | ०७ | १८ | २९ | ३९ | ५० | ०१ | १२ | २३ | ३२ | ४२ | ५२ | ०२ | १२ | २२ | ३२ | ४२ | ५२ | ०२ | १२ | २२ | ३२ | ४२ | ५२ | ०२ | १२ | २२ | ३२ | ४२ | ५२ | ०२ |
| ३२३ | ३८ | २४ | १० | ५६ | ४२ | २८ | १४ | ०० | ५८ | ५६ | ५४ | ५२ | ५० | ४८ | ४६ | ४४ | ४२ | ४० | ३८ | ३६ | ३४ | ३२ | ३० | २८ | २६ | २४ | २२ | २० | १८ | १६ |
| सिंह | २४ | २४ | २४ | २४ | २४ | २५ | २५ | २५ | २५ | २५ | २५ | २५ | २६ | २६ | २६ | २६ | २६ | २६ | २७ | २७ | २७ | २७ | २७ | २७ | २७ | २८ | २८ | २८ | २८ | २८ |
| | १२ | २२ | ३२ | ४२ | ५२ | ०२ | १२ | २२ | ३१ | ४० | ४९ | ५९ | ०८ | १७ | २६ | ३६ | ४५ | ५४ | ०३ | १३ | २२ | ३१ | ४१ | ५० | ५९ | ०८ | १८ | २८ | ३६ | ४५ |
| २९९ | १४ | १२ | १० | ०८ | ०६ | ०४ | ०२ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ |
| कन्या | २८ | २९ | २९ | २९ | २९ | २९ | २९ | ३० | ३० | ३० | ३० | ३० | ३० | ३० | ३१ | ३१ | ३१ | ३१ | ३१ | ३१ | ३२ | ३२ | ३२ | ३२ | ३२ | ३२ | ३२ | ३३ | ३३ | ३३ |
| | ५५ | ०४ | १३ | २२ | ३२ | ४१ | ५० | ०० | ०९ | १८ | २७ | ३७ | ४६ | ५५ | ०४ | १४ | २३ | ३२ | ४१ | ५१ | ०० | ०९ | १९ | २८ | ३७ | ४६ | ५६ | ०५ | १४ | २३ |
| २७८ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ |
| तुला | ३३ | ३३ | ३३ | ३४ | ३४ | ३४ | ३४ | ३४ | ३४ | ३४ | ३५ | ३५ | ३५ | ३५ | ३५ | ३५ | ३६ | ३६ | ३६ | ३६ | ३६ | ३६ | ३७ | ३७ | ३७ | ३७ | ३७ | ३७ | ३८ | ३८ |
| | ३३ | ४२ | ५१ | ०० | १० | १९ | २८ | ३८ | ४७ | ५७ | ०७ | १७ | २७ | ३७ | ४७ | ५७ | ०७ | १७ | २७ | ३७ | ४७ | ५७ | ०७ | १७ | २७ | ३७ | ४७ | ५७ | ०७ | १७ |
| २७८ | ०८ | २४ | ४९ | ५६ | १२ | २८ | ४४ | ०० | ५८ | ५६ | ५४ | ५२ | ५० | ४८ | ४६ | ४४ | ४२ | ४० | ३८ | ३६ | ३४ | ३२ | ३० | २८ | २६ | २४ | २२ | २० | १८ | १६ |
| वृश्चिक | ३८ | ३८ | ३८ | ३८ | ३९ | ३९ | ३९ | ३९ | ३९ | ३९ | ४० | ४० | ४० | ४० | ४० | ४१ | ४१ | ४१ | ४१ | ४१ | ४१ | ४२ | ४२ | ४२ | ४२ | ४२ | ४३ | ४३ | ४३ | ४३ |
| | २७ | ३७ | ४७ | ५७ | ०७ | १७ | २७ | ३७ | ४७ | ५८ | ०९ | २० | ३० | ४१ | ५२ | ०३ | १३ | २४ | ३५ | ४६ | ५६ | ०७ | १८ | २९ | ४० | ५० | ०१ | १२ | २३ | ३३ |
| २९९ | १४ | १२ | १० | ०८ | ०६ | ०४ | ०२ | ०० | ४६ | ३२ | १८ | ०४ | ५० | ३६ | २२ | ०८ | ५४ | ४० | २६ | १२ | ५८ | ४४ | ३० | १६ | ०२ | ४८ | ३४ | २० | ०६ | ५२ |
| धनु | ४३ | ४३ | ४४ | ४४ | ४४ | ४४ | ४४ | ४५ | ४५ | ४५ | ४५ | ४५ | ४५ | ४६ | ४६ | ४६ | ४६ | ४६ | ४६ | ४७ | ४७ | ४७ | ४७ | ४७ | ४८ | ४८ | ४८ | ४८ | ४८ | ४८ |
| | ४४ | ५५ | ०६ | १६ | २७ | ३८ | ४९ | ०० | १० | २१ | ३२ | ४३ | ५३ | ०४ | १५ | २६ | ३६ | ४७ | ५८ | ०९ | १९ | ३० | ४१ | ५२ | ०३ | १३ | २४ | ३५ | ४६ | ५६ |
| ३२३ | ३८ | २४ | १० | ५६ | ४२ | २८ | १४ | ०० | ४६ | ३२ | १८ | ०४ | ५० | ३६ | २२ | ०८ | ५४ | ४० | २६ | १२ | ५८ | ४४ | ३० | १६ | ०२ | ४८ | ३४ | २० | ०६ | ५२ |
| मकर | ४९ | ४९ | ४९ | ४९ | ४९ | ५० | ५० | ५० | ५० | ५० | ५० | ५१ | ५१ | ५१ | ५१ | ५१ | ५१ | ५२ | ५२ | ५२ | ५२ | ५२ | ५२ | ५३ | ५३ | ५३ | ५३ | ५३ | ५३ | ५४ |
| | ०७ | १८ | २९ | ३९ | ५० | ०१ | १२ | २३ | ३२ | ४२ | ५२ | ०२ | १२ | २२ | ३२ | ४२ | ५२ | ०२ | १२ | २२ | ३२ | ४२ | ५२ | ०२ | १२ | २२ | ३२ | ४२ | ५२ | ०२ |
| ३२३ | ३८ | २४ | १० | ५६ | ४२ | २८ | १४ | ०० | ५८ | ५६ | ५४ | ५२ | ५० | ४८ | ४६ | ४४ | ४२ | ४० | ३८ | ३६ | ३४ | ३२ | ३० | २८ | २६ | २४ | २२ | २० | १८ | १६ |
| कुम्भ | ५४ | ५४ | ५४ | ५४ | ५४ | ५५ | ५५ | ५५ | ५५ | ५५ | ५५ | ५५ | ५६ | ५६ | ५६ | ५६ | ५६ | ५६ | ५७ | ५७ | ५७ | ५७ | ५७ | ५७ | ५७ | ५८ | ५८ | ५८ | ५८ | ५८ |
| | १२ | २२ | ३२ | ४२ | ५२ | ०२ | १२ | २२ | ३१ | ४० | ४९ | ५१ | ०८ | १७ | २६ | ३६ | ४५ | ५४ | ०३ | १३ | २२ | ३१ | ४१ | ५० | ५९ | ०८ | १८ | २७ | ३६ | ४५ |
| २९९ | १४ | २२ | १० | ०८ | ०६ | ०४ | ०२ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ |
| मीन | ५८ | ५९ | ५९ | ५९ | ५९ | ५९ | ५९ | ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०१ | ०१ | ०१ | ०१ | ०१ | ०१ | ०२ | ०२ | ०२ | ०२ | ०२ | ०२ | ०२ | ०३ | ०३ | ०३ |
| | ५५ | ०४ | १३ | २२ | ३२ | ४१ | ५० | ०० | ०९ | १८ | २७ | ३७ | ४६ | ५५ | ०४ | १४ | २३ | ३२ | ४१ | ५१ | ०० | ०९ | १९ | २८ | ३७ | ४६ | ५६ | ०५ | १४ | २३ |
| २७८ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ | ०८ | २४ | ४० | ५६ | १२ | २८ | ४४ | ०० | १६ | ३२ | ४८ | ०४ | २० | ३६ | ५२ |

**नतकालसाधनम्—** रात्रेः शेषमितं युतं दिनदलेनाह्नो: गतं शेषकम्। विश्लेष्यं खलु पूर्वपश्चिमनतं त्रिंशच्च्युतं चोन्नतम्।।
**यथा**—श्रावणकृष्ण प्रतिपदा शुक्र को इष्टदण्डादि ११।३० के समय दिनार्द्ध—इष्टकाल = १६।५६—११।३० = ०५।२६ = पूर्वनतघटी।

**दशमलग्नोदाहरणम्—** श्रावणकृष्ण प्रतिपदा शुक्र को इष्टदण्डादि ११।३० है। नतकालानयनविधि से इस काल का पूर्वनत ०५।२६ दण्डादि हुआ। इसे सूर्य के मिथुनराशि के २५ अंश के नीचे दण्डादि १८।१३।४८ में घटाया तो १८।१३।४८—०५।२६ = १२।४७।४८ दण्डादि हुआ। यह फल दशमलग्नसारिणी में वृषराशि के २४ अंश के आगे २५ अंश के नीचे प्राप्त हुआ। अतः उक्त समय २५ अंश से वृष दशमलग्न हुआ।

### • प्रथमादिमासेषु बालकानां दन्तजननफलबोधकचक्रम् •

| मासाः | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| फलानि | स्वयंनाशः | अनुजनाशः | भगिनीनाशः | मातृनाशः | अग्रजनाशः | भोगाप्तिः | पितृसुखम् | पुष्टिः | धनलाभः | सौख्यम् | सुखाप्तिः | सम्पत्तिः |

जन्मकाल एव दन्तयुक्तो बालः आत्मानम्, पितरं मातरञ्च नाशयति। एवमेव निषिद्धसमये ऊर्ध्वभागे दन्तजननेऽपि आत्म—पितृ—मातृनाशको भवति। तत्र दन्तजननशान्तिर्विधेया। ततोऽशुभफलनाशः, शुभफलावाप्तिर्भवति।

### • बालस्य प्रथमदोलारोहणमुहूर्तः •

जन्मदिनात् १०,१२,१६,१८,३२ दिवसेषु, सोमबुधबृहस्पतिशुक्रवासरे, अश्विनी, रोहिणी, मृगशिरा, पुष्य, उत्तरा३, हस्त, चित्रा, अनुराधा, अभिजित्, रेवतीनक्षत्रेषु, रिक्तामारहिततिथौ, चरलग्ने शुभयुतेक्षिते, लग्नात् १,४,५,७,९,१०,११ गतैः शुभग्रहैः, ३,६,११ गतैः पापग्रहैः शुभम्। तत्र सूर्यनक्षत्रात् पञ्चमिते चन्द्रनक्षत्रे आरोग्यम्, ततः पञ्चनक्षत्रे कष्टम्, ततः पञ्चनक्षत्रे कृशत्वम्, ततः पञ्चनक्षत्रे रोगभयम्, ततः सप्तनक्षत्रे सुखम्।

## • औषधिभक्षणमुहूर्तः •

अश्विनी, मृगशिरा, पुनर्वसु, पुष्य, हस्त, चित्रा, स्वाती, अनुराधा, मूल, अभिजित्, श्रवणा, धनिष्ठा, शतभिषा, रोहिणीनक्षत्रेषु। शुभतिथिषु। सूर्यचन्द्रबुधबृहस्पतिशुक्रदिनेषु। ३, ६, ९, १२ लग्नेषु, शुभैः ३, ६, ९, १२ राशिगतैः, लग्नात् ७, ८, १२ग्रहरहितेषु औषधिभक्षणं शुभम्। जन्मनक्षत्रे औषधिभक्षणमशुभम्।

## • चिकित्सामुहूर्तः •

अश्विनी, रोहिणी, मृगशिरा, पुष्य, हस्त, चित्रा, स्वाती, अनुराधा, ज्येष्ठा, अभिजित्, श्रवणा, शतभिषानक्षत्रेषु। सूर्यचन्द्रमङ्गलबृहस्पतिशुक्रदिनेषु। शुभतिथिलग्नेषु शुभम्।

## • उग्रकर्ममुहूर्तः •

भरणी, आर्द्रा, आश्लेषा, मघा, पूर्वा३, ज्येष्ठा, मूलनक्षत्रेषु। मङ्गलशनिदिनेषु। १, ८, १०, ११ लग्नेषु। १, ३, ४, ५, ९, १०, ११, १४ तिथिषु शुभम्।

## • मोटरबससाइकिल्यानादिचालनमुहूर्तः •

अश्विनी, मृगशिरा, पुनर्वसु, हस्त, चित्रा, स्वाती, अनुराधा, ज्येष्ठा, रेवतीनक्षत्रेषु। चन्द्रमङ्गलबृहस्पतिशुक्रशनिदिनेषु। १, २, ३, ५, ६, ७, ८, १०, ११, १३, १५ तिथिषु। चतुर्थेशे बलयुक्ते १, ४, ५, ७, ९, १० स्थिते, लग्नेशदशमेशनवमेशैरपि १, ४, ५, ७, ९, १० गतैर्बलयुक्तैः, पापैः ३, ६, ११ स्थानस्थितैः यानादिचालनं शुभम्।

• **चरकारकग्रहाः**— ग्रहेषु सर्वाधिकांशवानात्मकारकस्तन्न्यूनांशक्रमेणामात्य—भ्रातृमातृ—पितृपुत्रज्ञातिकारकाः ज्ञेयाः। अंशसाम्ये कलाधिक्यम्, कलादिसाम्ये बलाधिक्यं ग्राह्यम्।

• **स्थिरकारकाः**— तन्वादिभावानां क्रमेण सूर्य—बृहस्पति—मङ्गल—चन्द्रबृहस्पति—बृहस्पति—मङ्गल—शुक्र—शनि—बृहस्पति—बुध—शुक्र—शनयः स्थिरकारका भवन्ति।

• **स्वर्णादिचरणकजन्मज्ञानम्**— जन्मकाले जन्मलग्नाच्चन्द्रे १,६,११ स्थिते स्वर्णपादे, २,५,९ स्थिते रजतपादे, ३,७,१० स्थिते ताम्रपादे, ४,८,१२स्थिते लौहपादे जन्म ज्ञेयम्।

• **आर्द्रादिद्वादशनक्षत्रेषु** रजतपादे, ज्येष्ठादिसप्तसु स्वर्णपादे, पूर्वाभाद्रादिपञ्चसु ताम्रपादे, कृत्तिकादिषु लौहपादे जन्म भवति। **तेषां फलम्**— स्वर्णपादेत्युत्कृष्टम्, रजतपादे शोभनम्, ताम्रपादे मध्यमम्, लौहपादे च हीनफलमिति।

## • होरालग्नानयनम् •

द्विघ्नेष्टनाड्यः पञ्चाप्ता यच्छेषञ्च पलीकृतम्।
दशाप्तमंशास्ते योज्या रवौ होरेदयो भवेत्॥

## • होराचक्रम् •

| राशि | मेष | वृष | मिथुन | कर्क | सिंह | कन्या | तुला | वृश्चिक | धनु | मकर | कुम्भ | मीन |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १५° | सूर्य | चन्द्र | सूर्य | चन्द्र | सूर्य | चन्द्र | सूर्य | चन्द्र | सूर्य | चन्द्र | सूर्य | चन्द्र |
| ३०° | चन्द्र | सूर्य | चन्द्र | सूर्य | चन्द्र | सूर्य | चन्द्र | सूर्य | चन्द्र | सूर्य | चन्द्र | सूर्य |

## • राशीनां स्वामिचरादिसंज्ञाघातादिचक्रम् •

| राशि | मेष | वृष | मिथुन | कर्क | सिंह | कन्या | तुला | वृश्चिक | धनु | मकर | कुम्भ | मीन |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| स्वामी | मङ्गल | शुक्र | बुध | चन्द्र | सूर्य | बुध | शुक्र | मङ्गल | बृहस्पति | शनि | शनि | बृहस्पति |
| संज्ञा | चर | स्थिर | द्विस्वभाव | चर | स्थिर | द्विस्वभाव | चर | स्थिर | द्विस्वभाव | चर | स्थिर | द्विस्वभाव |
| प्रकृति | पित्त | वात | सम | कफ | पित्त | वात | सम | कफ | पित्त | वात | सम | कफ |
| आकृति | ह्रस्व | ह्रस्व | सम | सम | दीर्घ | दीर्घ | दीर्घ | दीर्घ | सम | सम | ह्रस्व | सम |
| जाति | क्षत्रिय | वैश्य | शूद्र | विप्र | क्षत्रिय | वैश्य | शूद्र | विप्र | क्षत्रिय | वैश्य | शूद्र | विप्र |
| घातमास | कार्त्तिक | मार्ग | आषाढ | पौष | ज्येष्ठ | भाद्र | मार्ग | आषाढ | श्रावण | वैशाख | चैत्र | फाल्गुन |
| घाततिथि | नन्दा | पूर्णा | भद्रा | भद्रा | जया | पूर्णा | रिक्ता | नन्दा | जया | रिक्ता | जया | पूर्णा |
| दिन | रवि | शनि | चन्द्र | बुध | शनि | शनि | बृहस्पति | शुक्र | शुक्र | मङ्गल | बृहस्पति | शुक्र |
| नक्षत्र | मघा | हस्त | स्वाती | अनुराधा | मूल | श्रवणा | शतभिषा | रेवती | भरणी | रोहिणी | आर्द्रा | आश्लेषा |
| योग | विष्कम्भ | सुकर्मा | परिघ | व्याघात | धृति | शुभ | शुक्ल | व्यतीपात | वज्र | वैधृति | गण्ड | वज्र |
| करण | बव | शकुनि | चतुरङ्घ्रि | नाग | बव | कौलव | तैतिल | गर | तैतिल | शकुनि | वणिज | विष्टि |
| प्रहर | १ | ४ | ३ | १ | १ | १ | ४ | १ | १ | ४ | ३ | ४ |
| पुरुषचन्द्र | १ | ५ | ९ | २ | ६ | १० | ३ | ७ | ४ | ८ | ११ | १२ |
| स्त्रीचन्द्र | १ | ८ | ७ | ९ | ४ | ३ | ६ | २ | १० | ११ | ५ | १२ |

## • ग्रहाणामुच्चादिबोधकचक्रम् •

| ग्रह | सूर्य | चन्द्र | मङ्गल | बुध | बृहस्पति | शुक्र | शनि | राहु | केतु |
|---|---|---|---|---|---|---|---|---|---|
| उच्च | मेष १०° | वृष ३° | मकर २८° | कन्या १५° | कर्क ५° | मीन २७° | तुला २०° | मिथुन | धनु |
| नीच | तुला १०° | वृश्चिक ३° | कर्क २८° | मीन १५° | मकर ५° | कन्या २७° | मेष २०° | धनु | मिथुन |
| मूलत्रिकोण | सिंह | वृष | मेष | कन्या | धनु | तुला | कुम्भ | कुम्भ | सिंह |
| जातिः | क्षत्रिय | वैश्य | क्षत्रिय | शूद्र | विप्र | विप्र | चाण्डाल | चाण्डाल | चाण्डाल |
| दिक् | पूर्व | वायव्य | दक्षिण | उत्तर | ईशान | आग्नेय | पश्चिम | नैर्ऋत्य | नैर्ऋत्य |
| भाग्योदय | २२ वर्ष | २४ वर्ष | २८ वर्ष | २२ वर्ष | १६ वर्ष | २५ वर्ष | ३६ वर्ष | ४२ वर्ष | ४८ वर्ष |
| प्रकृतिः | पित्त | कफ | पित्त | सम | वात | कफ | वात | वात | वात |
| पुंसादिसंज्ञा | पुरुष | स्त्री | पुरुष | नपुंसक | पुरुष | स्त्री | नपुंसक | नपुंसक | पुरुष |
| आकृति | ह्रस्व | ह्रस्व | ह्रस्व | ह्रस्व | दीर्घ | ह्रस्व | दीर्घ | दीर्घ | दीर्घ |

## • द्रेष्काणचक्रम् •

| राशि | मेष | वृष | मिथुन | कर्क | सिंह | कन्या | तुला | वृश्चिक | धनु | मकर | कुम्भ | मीन |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १०° | मङ्गल | शुक्र | बुध | चन्द्र | सूर्य | बुध | शुक्र | मङ्गल | बृहस्पति | शनि | शनि | बृहस्पति |
| २०° | सूर्य | बुध | शुक्र | मङ्गल | बृहस्पति | शनि | शनि | बृहस्पति | मङ्गल | शुक्र | बुध | चन्द्र |
| ३०° | बृहस्पति | शनि | शनि | बृहस्पति | मङ्गल | शुक्र | बुध | चन्द्र | सूर्य | बुध | शुक्र | मङ्गल |

## • वर्णज्ञानाय सप्तनाडीचक्रम् •

| स्वामी | शनि | रवि | मङ्गल | बृहस्पति | शुक्र | बुध | चन्द्र |
|---|---|---|---|---|---|---|---|
| नक्षत्र | कृत्तिका | रोहिणी | मृगशिरा | आर्द्रा | पुनर्वसु | पुष्य | आश्लेषा |
| नक्षत्र | विशाखा | स्वाती | चित्रा | हस्त | उत्तरफल्गुनी | पूर्वफल्गुनी | मघा |
| नक्षत्र | अनुराधा | ज्येष्ठा | मूल | पूर्वाषाढ | उत्तराषाढ | अभिजित् | श्रवणा |
| नक्षत्र | भरणी | अश्विनी | रेवती | उत्तरभाद्र | पूर्वभाद्र | शतभिषा | धनिष्ठा |
| संज्ञा | चण्डा | वाता | वह्नि | सौम्या | नीरा | जला | अमृता |

## • ग्रहाणां धारणाय मणयः •

| सूर्य | चन्द्र | मङ्गल | बुध | बृहस्पति | शुक्र | शनि | राहु | केतु |
|---|---|---|---|---|---|---|---|---|
| माणिक्य | मुक्ता | विद्रुम | पन्ना | पोखराज | हीरा | नीलमणि | गोमेद | लहसुनियाँ |
| गारनेट | मूनस्टोन | मूङ्गा | लीली | सुनहला | स्फटिक | यमुनियाँ | लाजावर्त्त | लाजावर्त्त |
| विद्रुम | चाँदी | मूङ्गा | सोना | मोती | चाँदी | लौह | लाजावर्त्त | लाजावर्त्त |

## • नवमांशचक्रम् •

| राशि | मेष | वृष | मिथुन | कर्क | सिंह | कन्या | तुला | वृश्चिक | धनु | मकर | कुम्भ | मीन |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ३।२० | मं. | श. | शु. | चं. | मं. | श. | शु. | चं. | मं. | श. | शु. | चं. |
| ६।४० | शु. | श. | मं. | सू. | शु. | श. | मं. | सू. | शु. | श. | मं. | सू. |
| १०।०० | बु. | बृ. | बृ. | बु. | बु. | बृ. | बृ. | बु. | बु. | बृ. | बृ. | बु. |
| १३।२० | चं. | मं. | श. | शु. | चं. | मं. | श. | शु. | चं. | मं. | श. | शु. |
| १६।४० | सू. | शु. | श. | मं. | सू. | शु. | श. | मं. | सू. | शु. | श. | मं. |
| २०।०० | बु. | बु. | बृ. | बृ. | बु. | बु. | बृ. | बृ. | बु. | बु. | बृ. | बृ. |
| २३।२० | शु. | चं. | मं. | श. | शु. | चं. | मं. | श. | शु. | चं. | मं. | श. |
| २६।४० | मं. | सू. | शु. | श. | मं. | सू. | शु. | श. | मं. | सू. | शु. | श. |
| ३०।०० | बृ. | बु. | बु. | बृ. | बृ. | बु. | बु. | बृ. | बृ. | बु. | बु. | बृ. |

## • त्रिंशांशचक्रम् •

| विषमराशौ | | समराशौ | |
|---|---|---|---|
| अंशाः | मेषमिथुनसिंहतुलाधनुकुम्भ | अंशाः | वृषकर्ककन्यावृश्चिकमकरमीन |
| ०५° | मङ्गल | ०५° | शुक्र |
| १०° | शनि | १२° | बुध |
| १८° | बृहस्पति | २०° | बृहस्पति |
| २५° | बुध | २५° | शनि |
| ३०° | शुक्र | ३०° | मङ्गल |

## • त्रिविधायुर्बोधकचक्रम् •

| दीर्घायुः | मध्यमायुः | अल्पायुः |
|---|---|---|
| चरभे लग्नेशः<br>चरभेऽष्टमेशः | चरभे लग्नेशः<br>स्थिरभेऽष्टमेशः | चरभे लग्नेशः<br>द्विस्वभेऽष्टमेशः |
| स्थिरभे लग्नेशः<br>द्विस्वभेऽष्टमेशः | स्थिरभे लग्नेशः<br>चरभेऽष्टमेशः | स्थिरभे लग्नेशः<br>स्थिरभेऽष्टमेशः |
| द्विस्वभे लग्नेशः<br>स्थिरभेऽष्टमेशः | द्विस्वभे लग्नेशः<br>द्विस्वभेऽष्टमेशः | द्विस्वभे लग्नेशः<br>चरभेऽष्टमेशः |

लग्नेशाष्टमेशयोरिव लग्नचन्द्राभ्यां (शनिचन्द्राभ्यां) लग्नहोरालग्नाभ्याञ्चायुर्निर्णयम्।

## • आयुर्विचारः •

लग्नसप्तमयोरन्यतरस्थिते चन्द्रे लग्नचन्द्राभ्यामन्यथा शनिचन्द्राभ्याम्, लग्नेशाष्टमेशाभ्यां लग्नहोरालग्नाभ्याञ्चेति प्रकारत्रयेणायुर्निर्णेयम्। प्रकारत्रयेप्येकरूपायुष्यागतं तदेव ग्राह्यम्। विभेदे प्रकारद्वयागतायुर्ग्राह्यम्, विषमे जन्मलग्ने द्वितीयेशाष्टमेशयोर्यो बली, समे जन्मलग्ने द्वादशेशषष्ठेशयोर्यो बली तस्य केन्द्रे स्थित्या दीर्घायुः, पणफरे मध्यायुः, आपोक्लिमे चाल्पायुः। इत्थमेवात्मकारकवशेनापि। १, ८ ईशयोः कारकेण सहैक्ये योगे वा मध्यायुरेव। विषमे जन्मलग्ने कारकस्तृतीये, समे जन्मलग्ने कारको यदि चैकादशे भवेत्तर्हि कारकायुषि केन्द्रे दीर्घायुः, पणफरे मध्यमायुरापोक्लिमे चाल्पायुः। यदि लग्नेशाष्टमेशदशमेशाः केन्द्रत्रिकोणलाभगास्तदा दीर्घायुर्योगः। यदि लग्नेशः सूर्यस्य मित्रन्तदा दीर्घायुर्योगः, समश्चेन्मध्यमायुर्योगः, शत्रुस्तदा अल्पायुर्योगः। पूर्वोक्तचक्रद्वारा प्रकारत्रयेण दीर्घायुर्योगे प्राप्ते १२० वर्षाणि, प्रकारद्वयेन १०८ वर्षाणि, प्रकारेणैकेन ९६ वर्षाणि आयुः। एवमेव मध्यायुष्यपि प्रकारत्रयादिवशेन क्रमशः ८०, ७२, ६४ वर्षाण्यायुः। अल्पायुष्यपि ४०, ३६, ३२ वर्षाण्यायुरिति।

**आयुःस्थानमारकादिस्थानञ्च**— अष्टमञ्च तृतीयञ्च लग्नादायुरुदाहृतम्। द्वितीयं सप्तमञ्चैव मारकस्थानमुच्यते। क्वचित् षष्ठाष्टमव्ययेशदशास्वपि मारकसम्भवः। मारके मारकान्तरमशुभम्, परस्परं षष्ठाष्टमेशयोर्दशान्तर्दशा न शुभा। लग्नेशपञ्चमेशनवमेशानां दशा शुभा, त्रिषडायेशानां च पापाख्या। व्ययद्वितीयेशयोर्दशा स्थानान्तरानुगुण्येन साहचर्याद्वा फलदा। चतुर्थेशसप्तमेशदशमेशानां दशा मध्यमफलदा स्थानान्तरवशेन शुभाशुभफलप्रदा च। अष्टमेशदशा पापफलदा, परं स्थानान्तरशुभाशुभवशेन शुभपरमाशुभफलदेति।

**द्वादशांशज्ञानम्**—प्रत्येकस्मिन् राशौ १२ द्वादशांशास्तत्र प्रतिद्वादशांशमानम् २।३० अंशात्मकं भवति। द्वादशांशेशाः स्वराशित एव गण्यन्ते।

# श्रावणकृष्णपक्षः

शकाब्दः १९४७, संवत् २०८२, सन् १४३३ साल, दिनाङ्क ११।०७।२०२५ ई. तो दिनाङ्क २४।०७।२०२५ ई. यावत्।
अशुद्धः ०४ तः शुद्धः, ग्रीष्मर्तुः ०७ तो वर्षर्तुः, सौम्यगोलः, सौम्यायनम् ०७ तो याम्यायनम्, पश्चिमे कालः।

| तिथयः दिनानि | तिथयः द. प. | तिथयः घं. मि. | नक्षत्राणि न. द. प. | नक्षत्राणि घं. मि. | योगाः यो. द. प. | करणानि क. द. प. | चन्द्रराशयः रा. द. प. | चन्द्रराशयः घं. मि. | स्पष्टसूर्यः राश्यादिः | दिनमानम् द. प. | सू. उ. घं. मि. | सू. अ घं. मि. | दिनाङ्काः रा. | दिनाङ्काः सौर गते | दिनाङ्काः अं. | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ०१ शु. | ५२।१६ | रा. ०२।०८ | पूषा. ०३।४४ | प्रा. ०६।४४ | वैधृतिः४२।३७ | बा. २२।०३ | ध. १९।१४ | दि. १२।५६ | ०२।२५।०१।४८ | ३३।५२ | ५।१४ | ६।४६ | २० | २७ | ११ | पूर्वोदितो बृहस्पतिः १८।१९ उपरि, वक्री बुधः ०४।५३, पूर्वोत्तरयात्रा पूर्वाषाढे, श्रावणे वर्जयेच्छाकम्। |
| ०२ श. | ५१।२३ | रा. ०१।४७ | उषा. ०५।४२ | दि. ०७।३१ | विष्क. ३९।३९ | तै. २१।५० | मकरः | अहोरात्रम् | ०२।२५।५८।४३ | ३३।५० | ५।१४ | ६।४६ | २१ | २८ | १२ | अशून्यशयनव्रतम्, पूर्वां विना यात्रा श्रवणायाम्। |
| ०३ र. | ४९।१८ | रा. १२।५७ | श्रवणा०६।२३ | दि. ०७।४७ | प्रीतिः ३५।४३ | व. २०।२१ | म. ३६।०८ | रा. ०७।४१ | ०२।२६।५५।३७ | ३३।४९ | ५।१४ | ६।४६ | २२ | २९ | १३ | पश्चिमां विना यात्रा श्रवणायां ततः पूर्वयात्रा मकरस्थे चन्द्रे, पञ्चकारम्भो दिवा घं. ०७।४७ उपरि, भ. २०।२१ उपरि ४९।१८ यावत्। |
| ०४ चं. | ४६।११ | रा. ११।४२ | धनि. ०५।५३ | दि. ०७।३५ | आयु. ३०।५३ | ब. १७।४५ | कुम्भः | अहोरात्रम् | ०२।२७।५२।३१ | ३३।४८ | ५।१४ | ६।४६ | २३ | ३० | १४ | पुष्टो बृहस्पतिः शुद्धारम्भश्च १८।१९ उपरि, पश्चिमास्तः बुधः ३६।५९, गणाधिप ४ व्रतम्, चन्द्रोदयो रात्रौ घं. ०९।३०, सोमव्रतम्। |
| ०५ मं. | ४२।०७ | रा. १०।०६ | शत. ०४।२० | दि. ०६।५९ | सौभा. २५।१६ | कौ. १४।०९ | कुं. ४९।०८ | रा. १२।५४ | ०२।२८।४९।२५ | ३३।४७ | ५।१५ | ६।४५ | २४ | ३१ | १५ | मौनापञ्चमी; नागपञ्चमी मनसादेव्युत्थापनं पूजनञ्च, मधुश्रावणीपूजाकथारम्भः, पश्चिमयात्रा पञ्चम्यां पूर्वभाद्रे। ❖ भ. ०४।२७ यावत्, गं. ४३।०७ उपरि ५८।०७ यावत्। |
| ०६ बु. | ३७।१२ | रा. ०८।०८ | पूभा. ०१।५९ | प्रा. ०६।०३ | शोभ. १८।५७ | ग. ०९।४० | मीनः | अहोरात्रम् | ०२।२९।४६।१९ | ३३।४६ | ५।१५ | ६।४५ | २५ | ३२ | १६ | मासान्तः, उत्तरभाद्रदं. ५६।५१, भ. ३७।१२ उपरि। |
| ०७ बृ. | ३१।४१ | सं. ०५।५५ | रेवती ५५।०७ | रा. ०३।१८ | अगं. १२।०१ | वि. ०४।२७ | मी. ५५।०७ | रा. ०३।१८ | ०३।००।४३।१३ | ३३।४५ | ५।१५ | ६।४५ | २६ | ०१ | १७ | कर्के रविः ०१।१८ मु. ३० फलं साम्यम्, याम्यायनसङ्क्रान्तिपुण्यकालो घं. ०५।१५ उपरि घं. ०५।३१ यावत्पूर्वाह्णे, पुण्याहः, याम्यायनारम्भः ०१।१८ उपरि, पञ्चकान्तो रात्रौ घं. ०३।१८ उपरि, ❖ |
| ०८ शु. | २५।४३ | दि. ०३।३२ | अश्वि. ५१।०५ | रा. ०१।४१ | सुकर्मा०४।४५ | कौ. २५।४३ | मेषः | अहोरात्रम् | ०३।०१।४०।०७ | ३३।४४ | ५।१५ | ६।४५ | २७ | ०२ | १८ | धृतिदं. ५२।२९, मासादिः, इन्द्रसावर्णिमन्वादिः। |
| ०९ श. | १९।३३ | दि. ०१।०५ | भर. ४६।५४ | रा. १२।०२ | शूलः ४९।३२ | ग. १९।३३ | मेषः | अहोरात्रम् | ०३।०२।३७।०७ | ३३।४२ | ५।१६ | ६।४४ | २८ | ०३ | १९ | भ. ४६।२७ उपरि, (०९–१०) एकोद्दिष्टम्। |
| १० र. | १३।२१ | दि. १०।३६ | कृत्ति. ४२।४८ | रा. १०।२३ | गण्डः ४२।०० | वि. १३।२१ | मे. ००।५३ | प्रा. ०५।३७ | ०३।०३।३४।०७ | ३३।४० | ५।१६ | ६।४४ | २९ | ०४ | २० | भ. १३।२१ यावत्, पुष्ये रविः ३१।५८ पुंस्त्रीचंचंयोगो धनुर्लग्ने शिखिवाहनखण्डनाडीपतिश्शनिस्तेन वातातपखण्डवृष्टियोगः। |
| ११ चं. | ०७।१७ | दि. ०८।११ | रोहि. ३८।५८ | रा. ०८।५१ | वृद्धिः ३४।४० | बा. ०७।१७ | वृषः | अहोरात्रम् | ०३।०४।३१।०६ | ३३।३८ | ५।१६ | ६।४४ | ३० | ०५ | २१ | कामदा ११ व्रतं सर्वेषाम्, सोमव्रतम्, दक्षिणयात्रैकादश्याम्। |
| १२ मं. | ०१।३६ | प्रा. ०५।५५ | मृग. ३५।३३ | रा. ०७।३० | ध्रुवः २७।४२ | तै. ०१।३६ | वृ. ०७।१६ | दि. ०८।११ | ०३।०५।२८।०५ | ३३।३६ | ५।१७ | ६।४३ | ३१ | ०६ | २२ | दूर्वादलेन पारणम्, त्रयोदशीदं. ५४।५०, अवमम्, भ. ५६।२६ उपरि, प्रदोष १३ व्रतम्उत्तरां विना यात्रा मृगशिरसि। |
| १४ बु. | ५२।०७ | रा. ०२।०८ | आर्द्रा ३२।५१ | सं. ०६।२५ | व्या. २१।१६ | वि. २४।१७ | मिथुनम् | अहोरात्रम् | ०३।०६।२५।०४ | ३३।३४ | ५।१७ | ६।४३ | ०१ | ०७ | २३ | प्रदोष १४ व्रतम्, भ. २४।१७ यावत्। |
| ३० बृ. | ४८।३४ | रा. १२।४३ | पुन. ३१।०२ | सं. ०५।४२ | हर्षणः १५।३१ | च. २०।२१ | मि. १६।३० | दि. ११।५३ | ०३।०७।२२।०३ | ३३।३३ | ५।१७ | ६।४३ | ०२ | ०८ | २४ | श्रावणी ३० स्नानदानादिः, देवसावर्णिमन्वादिः, दक्षिणां विना यात्रा प्रतिपदि। |

### मिश्रमानकालिकदैनिकमङ्गलादिस्पष्टग्रहा दिनद्वयग्रहान्तरं गतिश्च

| तिथयः दिनानि | मङ्गलः | बुधः | बृहस्पतिः | शुक्रः | शनिः | केतुः | मिश्रमानम् |
|---|---|---|---|---|---|---|---|
| ०१ शु. | ०४।१९।००।१४ | ०३।१५।२४।३१ | ०२।१३।४१।०१ | ०१।१४।३१।५० | ११।०५।२३।५४ | ०४।२९।२२।१६ | ४६।५६ |
| ०२ श. | ०४।१९।३६।२२ | ०३।१५।०२।२४ | ०२।१३।५४।५२ | ०१।१५।४०।२६ | ११।०५।२३।२१ | ०४।२९।१९।०५ | ४६।५५ |
| ०३ र. | ०४।२०।१२।३० | ०३।१४।४०।१७ | ०२।१४।०८।४३ | ०१।१६।४९।०२ | ११।०५।२२।४८ | ०४।२९।१५।५४ | ४६।५४ |
| ०४ चं. | ०४।२०।४८।३८ | ०३।१४।१८।१० | ०२।१४।२२।३४ | ०१।१७।५७।३८ | ११।०५।२२।१५ | ०४।२९।१२।४३ | ४६।५३ |
| ०५ मं. | ०४।२१।२४।४६ | ०३।१३।५६।०३ | ०२।१४।३६।२४ | ०१।१९।०६।१४ | ११।०५।२१।४२ | ०४।२९।०९।३२ | ४६।५२ |
| ०६ बु. | ०४।२२।००।५४ | ०३।१३।३३।५६ | ०२।१४।५०।१४ | ०१।२०।१४।५० | ११।०५।२१।०९ | ०४।२९।०६।२१ | ४६।५२ |
| ०७ बृ. | ०४।२२।३७।०१ | ०३।१३।११।५० | ०२।१५।०४।०४ | ०१।२१।२३।२६ | ११।०५।२०।३६ | ०४।२९।०३।११ | ४६।५२ |
| ०८ शु. | ०४।२३।१३।०८ | ०३।१२।४९।४४ | ०२।१५।१७।५४ | ०१।२२।३२।०१ | ११।०५।२०।०३ | ०४।२९।००।०१ | ४६।५२ |
| ०९ श. | ०४।२३।४९।४४ | ०३।१२।०२।३९ | ०२।१५।३१।३३ | ०१।२३।४१।०३ | ११।०५।१८।२७ | ०४।२८।५६।५० | ४६।५१ |
| १० र. | ०४।२४।२६।२० | ०३।११।१५।३४ | ०२।१५।४५।१२ | ०१।२४।५०।०४ | ११।०५।१६।५२ | ०४।२८।५३।३९ | ४६।५० |
